# Shri Krishnastavana Kavacham

# શ્રીકૃષ્ણસ્તવનકવચમ્

## Document Information

Text title : Shrikrishna Stavana Kavacham

File name : kRRiShNastavanakavacham.itx

Category : vishhnu, kavacha, krishna

Location : doc_vishhnu

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 1 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 1 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

Shri Krishnastavana Kavacham

# શ્રીકૃષ્ણસ્તવનકવચમ્

અથૈકોનચત્ત્વારિંશઃ પટલઃ

આનન્દભૈરવી ઉવાચ

અથ નાથ પ્રવક્ષ્યેઽહં સંસારસાધનોત્તમમ્ ।
યેન સાધનમાત્રેણ યોગી ભવતિ તત્ક્ષણાત્ ॥ ૩૯-૧॥

અનાયાસેન સિદ્ધિઃ સ્યાદ્ યદ્યન્મનસિ વર્તતે ।
ત્રૈલોક્યં મોહયેત્ક્ષિપ્રં ત્રૈલોક્યં વશમાનયેત્ ॥ ૩૯-૨॥

રામેણ સહિતં નિત્યં જગતાં સાક્ષિણં વરમ્ ।
જામદગ્ન્યકરામ્ભોજસેવિતં સર્વસેવિતમ્ ॥ ૩૯-૩॥

અનન્તસત્ત્વનિલયં વાસુકી સઙ્ગમાકુલમ્ ।
અષ્ટહસ્તાગ્રસુશ્રીદં નાનાલઙ્કારશોભિતમ્ ॥ ૩૯-૪॥

સ્વાધિષ્ઠાનગતં ધ્યાત્વા શીતલો જાયતે વશી ।
તત્સ્તોત્રં શ ૃણુ મે નાથ યત્પાઠાત્ સિદ્ધિમાપ્નુયાત્ ॥ ૩૯-૫॥

શ્રીકૃષ્ણસ્તોત્રં

બ્રહ્માદયઃ સુરાધીશા મુનયઃ ક્રતુરક્ષકાઃ ।
એતત્ સ્તોત્રં પુરા કૃત્વા જીવન્મુક્તો મહીતલે ॥ ૩૯-૬॥

અતઃ શ્રીકાલિકાનાથ સ્તોત્રં શ ૃણુ મહત્ફલમ્ ॥ ૩૯-૭॥

શ્રીવિષ્ણોરદ્ભુતકર્મણો બ્રહ્મર્ષિસ્ત્રિષ્ટુપ્છન્દઃ
શ્રીવિષ્ણુઃ શ્રીકૃષ્ણઃ શ્રીનારાયણો દેવતા
સર્વસ્તોત્રસારકવચમન્ત્રસિદ્ધ્યર્થે વિનિયોગઃ ॥

શ્રી કૃષ્ણં જગતામધીશમનઘં ધ્યાનાત્સિદ્ધિપ્રદં
ગોવિન્દં ભવસિન્ધુપારકરણં સન્તારણં કારણમ્ ।
શ્રી વિષ્ણું વનમાલિનં નરહરિં નારાયણં ગોકુલં
યોગેન્દ્રં નરનાથમાદિપુરુષં વૃન્દાવને ભાવયેત્ ॥ ૩૯-૮॥

મોક્ષશ્રીસહિતં કૃતાન્તવિકૃતં ધર્માર્ણવં સુન્દરં
શ્રીરામં બલરામભાવવિમલં નિત્યાકુલં સત્કુલમ્ ।
શ્રીશ્યામં કનકાદિહારવિલસત્લમ્બોદરં શ્રીધરં
તં વન્દે હરિમીશ્વરં ગુણવતીમાયાશ્રયં સ્વાશ્રયમ્ ॥ ૩૯-૯॥

વૈકુણ્ઠેશમશેષદોષરહિતં સાયુજ્યમોક્ષાત્મકં
નાનારત્નવિનિર્મિતા મમ પૂજા રાજેન્દ્રચૂડામણિમ્ ।
શોભામણ્ડલમણ્ડિતં સુરતરુચ્છાયાકરં યોગિનં
વિદ્યાગોપસુતાવૃતં ગુણમયં વાક્સિદ્ધયે ભાવયેત્ ॥ ૩૯-૧૦॥

સ્વાધિષ્ઠાનનિકેતનં પરજનં વિદ્યાધનં માયિનં
શ્રીનાથં કુલયોગિનં ત્રિભુવનોલ્લાસૈકબીજં પ્રભુમ્ ।
સંસારોત્સવભાવલાભનિરતં સર્વાદિદેશં સુખં
વન્દેઽહં વરસર્પશત્રુસફલે પૃષ્ઠે સ્થિરાનન્દદમ્ ॥ ૩૯-૧૧॥

ભાવાષ્ટં ભવભાવયોગજડિતં જાડ્યાપહં ભાસ્વરં
નિત્યં શુદ્ધગુણં ગભીરધિષણામોદૈકહેતું પતિમ્ ।
કીર્તિક્ષેમકરં મહાભયહરં કામાધિદૈવં શિવં
તત્તત્ષડ્દલમધ્યગેહરુચિરાનન્દૈકદેશાસ્પદમ્ ॥ ૩૯-૧૨॥

વન્દે શ્રીપતિમચ્યુતં નરહરિં દૈત્યારિશિક્ષ્યાકુલં
ગન્ધર્વપ્રભૃતેઃ સુગાયનરતં વંશીધરં ભાવદમ્ ।
રત્નાનામધિપં ગતિસ્થમચલં ગોવર્ધનાધારણં
વિશ્વામિત્રતપોધનાદિ મુનિભિઃ સંસેવિતં તૈજસમ્ ॥ ૩૯-૧૩॥

વન્દે ગોવિન્દપાદામ્બુજમજમજિતં રાજિતં ભક્તિમાર્ગે
સત્ત્વોત્પન્નં પ્રભુત્વં પરગણનમિતં ચારુમઞ્જીરહારમ્ ।
હંસાકારં ધવલગરુડાનન્દપૃષ્ઠે નિમગ્નં
બન્ધૂકારક્તસારાન્વિતચરણતલં સર્વદાશાન્તરાલમ્ ॥ ૩૯-૧૪॥

રાકિણ્યાઃ પ્રેમસિદ્ધં નવવયસિગતં ગીતવાદ્યાદિરાગં
રાગોત્પન્નં સુફલગુણદં ગોકુલાનન્દચન્દ્રમ્ ।
વાણી-લક્ષ્મી-પ્રિયં તં ત્રિભુવનસુજનાહ્લાદકર્તારમાદ્યં
વન્દે સિદ્ધાન્તસારં ગતિનતિરહિતં સારસઙ્કેતિતાસ્રમ્ ॥ ૩૯-૧૫॥

કામં કામાત્મકં તં વિધુગતશિરસં કૃષ્ણસમ્બોધનાન્તં

બીજં કામં પુનસ્તત્ પુરુષસુરતરું ભાવયિત્વા ભજેઽહમ્ ।
શ્રીકૃષ્ણં કૃષ્ણકૃષ્ણં નિરવધિસુખદં સુપ્રકાશં પ્રસન્નં
સ્વાધિષ્ઠાનાખ્યપદ્મે મનસિ ગતો ભવે સિદ્ધિસ્થલસ્થમ્ ॥ ૩૯-૧૬॥

આકાશે ચારુપદ્મે રસભયવલગં રક્તવર્ણં પ્રકાણ્ડં
આત્મારામં નરેન્દ્રં સકલરતિકરં કંસહન્તારમાદિમ્ ।
આદ્યન્તસ્થાનહીનં વિધિહરગમનં સેન્દ્રનીલામલાભં
ભાવોત્સાહં ત્રિસર્ગસ્થિતિપરમમરં ભાવયે ભાવસિદ્ધ્યૈ ॥ ૩૯-૧૭॥

સર્વેષાં જ્ઞાનદાનં રસદલકમલે સર્વદા ત્વં કરોષિ
આત્માનન્દં સુધાદિપ્રિયધનગુણિનામેકયોગપ્રધાનમ્ ।
માયાપૂર્ણઃ પ્રચયનવરસઃ પ્રીતિદેશઃ પ્રભેકઃ
શ્રીરાજાખ્યઃ પ્રપૂર્ણઃ મયિ ધનરહિતે દૃષ્ટિપાતં ભવાદૌ ॥ ૩૯-૧૮॥

કાલી શ્રીકુણ્ડલિન્યાઃ પરગૃહનિરતં ભાવકબ્રહ્મરૂપમ્ ।
મુક્તિચ્છત્રં પુરેશં નિજધનસુખં ભાર્યયા ક્રીડયન્તમ્ ।
સભાક્ષેત્રં નેત્રં નયમાનમયમત્પુરસંસ્થાભિષેકમ્ ॥ ૩૯-૧૯॥

ધ્યાત્વાઽહં પ્રણમામિ સૂક્ષ્મકમલે લોકાધિપં વ્યાધિપં
વૈકુણ્ઠં કૃષ્ણમીડે કુરુભવવિભવક્ષેમહન્તારમન્તમ્ ।
શાન્તાનાં જ્ઞાનગમ્યં સ્વનયનકમલે પાલયન્તં ત્રિમાર્ગં
વજ્રારિં પૂતનારિં દ્વયવકનરકધ્વાન્તસંહારસૂરમ્ ॥ ૩૯-૨૦॥

માન્યં લોકેષુ સર્વેષ્વતિશયમનસં કેવલં નિર્મલઞ્ચ
ઓઙ્કારં કારણાખ્યં સુગતિમતિમતાં માતૃકામન્ત્રસિદ્ધમ્ ।
સિદ્ધાનામાદિસિદ્ધં સુરરિપુશમનં કાલરૂપં રિપૂણાં var સુરરિપુમમલં
મૂલોર્ધ્વે ષડ્દલાન્તે મનસિ સુવિમલે પૂરયિત્વા મુકુન્દમ્ ॥ ૩૯-૨૧॥

નિત્યં સમ્ભાવયેઽહં નિજતનુસમતા સિદ્ધયે પૂજયામિ ।
ત્વં સાક્ષાદખિલેશ્વરઃ પ્રિયકરઃ શ્રીલોકહસ્તાર્ચિતઃ ।
ક્ષોણીશઃ પ્રલયાત્મકઃ પ્રતિગુણી જ્ઞાની ત્વમેકો મહાન્ ॥ ૩૯-૨૨॥

યદ્યેવં મમ પામરસ્ય કલુષં શ્રીધર્મહીનાન્દિતં
કૃત્વા પાદતલે યદીહ નિયતં વ્યારક્ષ રક્ષાત્મગમ્ ।
રાધાકૃષ્ણપદામલામ્બુજતલં ચૈતન્યમુક્ત્યાકુલં
સર્વત્રાદિગમાગમં ત્રિગમનં નિર્વાણમોક્ષાશ્રયમ્ ॥ ૩૯-૨૩॥

બાલં વૈરિવિનાશનં સુખમયં કૈવલ્યમોક્ષાસ્પદં
દૈવં દેવગણાર્ચિતં રસદલે ચારોપયામિ પ્રભો ।
નિર્દ્દિષ્ટં ભુવનાશ્રયં યતિપતિં નિર્વાણમોક્ષસ્થિતં
નિર્વાણાદિકમોદને પ્રચપલં શ્રીચઞ્ચલાસઙ્કુલમ્ ॥ ૩૯-૨૪॥

વન્દેઽહં પરમેશ્વરં સકલદૈત્યાનાં બલપ્રાણહમ્ ।
હંસારૂઢનિરક્ષણં ક્ષણગતં વાણીપતિં ભૂપતિમ્ ।
વાઞ્છાકલ્પલતાપતિં કુલપતિં વિદ્યાપતિં ગોપતિમ્ ॥ ૩૯-૨૫॥

શ્રીવિદ્યાપતિમાદિદેવપુરુષં વિશ્વેશ્વરપ્રેમગમ્ ।
શ્રીકુમ્ભોદ્ભવકાલસત્ત્વનિકરં ત્વાં ભાસ્કરં ભાવયે ।
સિદ્ધાનામભિચિહ્નયોગનિરતં રક્ષ ત્વમાદૌ હિ મામ્ ॥ ૩૯-૨૬॥

પ્રભો નિઃસઙ્કેતં ગુણમણિમતં શ્રેયસિ મતમ્ ।
મતામન્તઃ સુસ્થં વિગલિતમહાપ્રેમસુરસમ્ ।
મુદા વન્દે કૃષ્ણં હરકરતલામ્ભોજયજિતમ્ ॥ ૩૯-૨૭॥

પ્રભાપુઞ્જં રામાશ્રયપદમદં કામકુશલં
મહામન્ત્રચ્છાયાં રજનિમિલિતં ધ્વાન્તજડિતમ્ ।
ત્રિકોણસ્થં કુસ્થં કુગતિસુગતિં કારણગતિં
પ્રલીનં સંસ્થાનં જગતિ જગતાં ધર્મમુદયમ્ ॥ ૩૯-૨૮॥

રમેશં વાણીશં વિધિગતપદં શમ્ભુનિગતં
ત્રિકાલં યોગાનાં નયનકમલં શબ્દનિરતમ્ ।
કુલાનન્દં ગોપીજનહૃદયગં ગોપિયજિતં
વિધાનં ત્વામિન્દ્રં ગુરુતરમુપેન્દ્રં હરિરિપુમ્ ॥ ૩૯-૨૯॥

મુદા ત્વાં વન્દેઽહં ચપલં તાં મે નવહવે ।
કુલાલાપશ્રદ્ધામયમખિલસિદ્ધિપ્રદમનમ્ ।
મલાતીતં નીતં સુરનરસતાં શાસ્ત્રભવનમ્ ॥ ૩૯-૩૦॥

વિનોદં નારીણાં હૃદયરસિકં શોકરહિતમ્ ।
વિરાજં યજ્ઞાનાં હિતમતિગુણં યામિ શરણમ્ ॥ ૩૯-૩૧॥

એતત્સમ્બન્ધમાત્રી મમ કુલશિરસિ સ્થાયિનં પાતુ નિત્યં
ગોપીનાં પ્રાણનાથઃ પ્રતિદિનમનિશં ભાલદેશં પ્રપાયાત્ ।
ભાલાધોદેશસંસ્થં સમવતુ સહસા રાજરાજેશ્વરેશઃ

ગોપાન્વન્વો સુરેશઃ સ્થિત્યન્તશાસ્ત્રનેત્રં
સુખમખિલભવઃ કણ્ઠચ્છત્રાભિસંસ્થમ્ ॥ ૩૯-૩૨॥ (સુખમખિલમયઃ)
પૃષ્ઠસ્થં પાતુ શૌરિઃ પ્રતિદિનમમરો લિઙ્ગબાહ્યં કટિસ્થં
શમ્ભુપ્રેમાભિલાષી મમ તુ કુલપદં ગુહ્યદેશં પ્રપાયાત્ ।
આનન્દોદ્રેકકારી સકલતનુગતં પાતુ નિત્યં મુરારિઃ
દૈત્યારિશ્ચોરુમૂલં નૃહરિરવતુ મે જઙ્ઘયા પાદપદ્મમ્ ॥ ૩૯-૩૩॥ (નરહરિવતાજઙ્ઘ્યા)
એતત્સ્તોત્રં પઠેદ્વિદ્વાન્ નિયતો ભક્તિમાન્ શુચિઃ ।
સ્થિરો ભવતિ માસેન ષડ્દલે સર્વસિદ્ધિભાક્ ॥ ૩૯-૩૪॥

ઇતિ શ્રીરુદ્રયામલે ઉત્તરતન્ત્રે મહાતન્ત્રોદ્દીપને સિદ્ધમન્ત્રપ્રકરણે
ષટ્ચક્રપ્રકાશે ભૈરવભૈરવીસંવાદે શ્રીકૃષ્ણસ્તવનકવચં
નામૈકોનચત્વારિંશત્તમઃ પટલઃ ॥ ૩૯॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

---

*Shri Krishnastavana Kavacham*
pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*